शास्त्रशुद्धिः ।

अथ यथाशास्त्रं निकृष्टसात्त्विककर्त्तृभेदबुद्धिं प्रदर्श्य दुर्ब्बलाधिकारिणो भक्तियोगावलम्बिनः कर्त्तव्यमपि प्रदर्शयामः । यथा भागवते ३ । २९ । १० ।

"कर्म्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम् ।
यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः" ॥

दुर्ब्बलभक्तियोगाधिकारिकर्त्तव्यता च तत्रैव । ११ । ११ । ३४-४२ ।

"मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्च्चनम् ।
परिचर्य्या स्तुतिः प्रह्वगुणकर्म्मानुकीर्त्तनम् ॥
मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव ।
सर्व्वलाभोपहरणं दास्येनात्मनिवेदनम् ॥
मज्जन्मकर्म्मकथनं मम पर्व्वानुमोदनम् ।
गीत-ताण्डव-वादित्र-गोष्ठीभिर्मद्गृहोत्सवः ॥
यात्रा बलिविधानञ्च सर्व्ववार्षिकपर्व्वसु ।
वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम् ॥
ममार्च्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः ।
उद्यानोपवनाक्रीड़पुरमन्दिरकर्म्मणि ॥
संमार्ज्जनोपलेपाभ्यां सेकमण्डलवर्त्तनैः ।
गृहशुश्रूषणं मह्यं दासवद्यदमायया ॥
अमानित्वमदम्भित्वं कृतस्यापरिकीर्त्तनम् ।
अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितम् ॥
यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः ।
तत्तन्निवेदितं मह्यं तदानन्त्याय कल्पते ॥
सूर्य्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलम् ।
भूरात्मा सर्व्वभूतानि भद्र पूजापदानि च" ॥

हे भद्र ! एतानि मम पूजास्थानानि । अधुना कस्मिन् स्थले केन यजेत इत्याह तत्रव ११ । ११ । ४३-४५ ।

"सूर्य्ये तु विद्यया त्रय्या हविषाग्नौ यजेत माम् ।
आतिथ्येन तु विप्राग्र्ये गोष्वङ्ग यवसादिना ॥
वैष्णवे बन्धुसत्कृत्या हृदि खे ध्याननिष्ठया ।
वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ॥
स्थण्डिले मन्त्रहृदयैर्भोगैरात्मानमात्मनि ।
क्षेत्रज्ञं सर्व्वभूतेषु समत्वेन यजेत माम्" ॥

हृदि खे हृदयाकाशे । मुख्यधिया प्राणदृष्ट्या । जले जलाञ्जलिप्रदानरूपतर्पणपूर्व्वकैर्द्रव्यैः । स्थण्डिले भूमौ मन्त्रन्यासैः । भोगैरिति । देहे भोगैरात्मानं एतैरन्नादिभिर्देहस्थपरमात्मानं यजेऽहं नत्वविद्याकर्म्मजनितं देहं बिभर्म्मीति चिन्तयेत् ॥ क्षेत्रज्ञमिति । सर्व्वभूतेषु क्षेत्रज्ञरूपेणावस्थितं कूटस्थब्रह्मचैतन्यस्वरूपं मां समत्वेन यजेत ॥ • ॥ एतेषु स्थानेषु तव कीदृग्रूपं ध्येयमित्यपेक्षयाह तत्रैव ११ । ११ । ४६-४७ ।

"धिष्ण्येष्विति मद्रूपं शङ्खचक्रगदाम्बुजैः ।
युक्तं चतुर्भुजं शान्तं ध्यायन्नर्च्चेत् समाहितः ॥
इष्टापूर्त्तेन मामेवं यो यजेत समाहितः ।
लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया" ॥

यदा "मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्च्चनम्" इत्यारभ्य "लभते मयि सद्भक्तिम्" इत्यन्तैरेतैश्चतुर्द्दशश्लोकैर्धारणाध्यानायनभूतप्रतिमाद्याश्रयिणा भक्तियोगोपयोगिक्रिययैव सद्भक्तिलाभः प्रदर्शयामास स्वयं भगवान् । सुतरां तदा दुर्ब्बलाधिकारिणा भक्तियोगाश्रयिणापि प्रथमे क्रियायोग एव कर्त्तव्यः इति बोध्यतेऽन्यथाचित्तशुद्ध्यभावात् ज्ञानं न लभेत इति तात्पर्य्यार्थः ॥

ननु मा भूत्तत्त्वज्ञानं किन्तु शास्त्रविहितक्रियायोगशून्यया भक्त्या क्रमेण निर्गुणाया भक्तेरुदयेनैव चरितार्थतेति चेन्न तयोस्तत्त्वज्ञाननिर्गुणभक्तियोगयोर्लक्षणे नैक्यदर्शनात् उभयोरेवात्मसाक्षात्काररूपचरमफलत्वेनोक्तत्वाच्च । यथा श्रीमद्भागवते ३ । २९ । ११-१२ ।

"मद्गुणश्रुतिमात्रेण मयि सर्व्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे" ॥

ईदृग्भक्तिर्यदि बहुजन्मार्जितसुकृतिवशात् कस्यापि कथञ्चिदुत्पद्येत तर्हि सालोक्यादिमुक्तिं साधकान्तरैः प्रार्थनीयां भगवता स्वयं दीयमानामपि तादृग्भक्तो नेच्छतीति तन्निस्पृहतां दर्शयन्नाह । तत्रैव ३ । २९ । १३ ।

"सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः" ॥

अपि च तत्त्वज्ञानिनो निर्गुणभक्तस्य च तयोः शब्दतएव भेदः न तु लक्षणतः यत उभावेव लक्षणादिना सर्व्वत्र एकाचारौ एकनिष्ठाविवेकभावापन्नौ लक्ष्येते । यथा भागवते ११ । ११ । २९-३३ । भगवद्भक्तमस्य लक्षणमुपदिष्टवानुद्धवं प्रति भगवान् ।

"कृपालुरकृतद्रोहस्तितिक्षुः सर्व्वदेहिनाम् ।
सत्यसारोऽनवद्यात्मा समः सर्व्वोपकारकः ॥
कामैरहतधीर्दान्तो मृदुः शुचिरकिञ्चनः ।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः ॥
अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः ।
अमानी मानदः कल्पो मैत्रः कारुणिकः कविः" ॥

कविः क्रान्तदर्शी सर्व्वज्ञ इत्यर्थः ।

"आज्ञायैवं गुणान् दोषान् मया दिष्टानपि स्वकान् ।
धर्म्मान् सन्त्यज्य यः सर्व्वान् मां भजेत स सत्तमः ॥
ज्ञात्वा ज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः ।
भजन्त्यनन्यभावेन ते मे भक्ततमा मताः" ॥

तथा, ज्ञानिनोऽपि लक्षणं प्रदर्शयामास । यथा, तत्रैव ११ । ११ । १२-१७ ।

"न तथा बध्यते विद्वांस्तत्र तत्रादयन् गुणान् ।
प्रकृतिस्थोऽप्यसंसक्तो यथा खं सवितानिलः ॥
वैशारद्येक्षयाऽसंगशितया छिन्नसंशयः ।
प्रतिबुद्ध इव स्वप्नान् नानात्वाद् विनिवर्त्तते" ॥
यस्य स्युर्वीतसङ्कल्पाः प्राणेन्द्रियमनोधियाम् ।
वृत्तयः स विनिर्मुक्तो देहस्थोऽपि हि तद्गुणैः ॥
यस्यात्मा हिंस्यते हिंस्रैर्येन किञ्चिद् यदृच्छया ।
अर्च्च्यते वा क्वचित्तत्र न व्यतिक्रियते बुधः ॥
न स्तुवीत न निन्देत कुर्व्वतः साध्वसाधु वा ।
वदतो गुणदोषाभ्यां वर्ज्जितः समदृङ्मुनिः ॥
न कुर्य्यान्न वदेत् किञ्चिन्न ध्यायेत् साध्वसाधु वा ।
आत्मारामोऽनया वृत्त्या विचरेज्जड़वन्मुनिः" ॥

ननु भक्तिज्ञानयोश्चरमफलैकत्वेपि भक्तेः समधिकप्रसंशादर्शनात् भक्तिरेव गरीयसीति चेत् न भक्तिवत् ज्ञानस्यापि प्रसंशादर्शनात् आत्मसाक्षात्कृतौ साक्षात्कारणत्वाच्च । यथा श्रीमद्भागवते ११ । १९ । १—५ ।

श्रीभगवानुवाच ।

"यो विद्याश्रुतसम्पन्न आत्मवान्नानुमानिकः ।
मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत् ॥
ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च सम्मतः ।
स्वर्गश्चैवापवर्गश्च नान्योऽर्थो मदृते प्रियः ॥
ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम ।
ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्त्ति माम् ॥
तपस्तीर्थं जपो दानं पवित्राणीतराणि च ।
नालं कुर्व्वन्ति तां सिद्धिं या ज्ञानकलया कृता ॥
तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ।
ज्ञानविज्ञानसम्पन्नो भज मां भक्तिभावितः" ॥

किञ्च भगवद्गीतायां ४ । ३३-३९ ।

"श्रेयान् द्रव्यमयाद् यज्ञाज्ज्ञानयज्ञः परन्तप ! ।
सर्व्वं कर्म्माखिलं पार्थ ! ज्ञाने परिसमाप्यते ॥
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥
यज्ज्ञात्वा न पुनर्म्मोहमेवं यास्यसि पाण्डव ! ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥
अपि चेदसि सर्व्वेभ्यः पापिभ्यः पापकृत्तमः ।
सर्व्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥
यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्ज्जुन ! ।
ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा ॥
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥
श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति" ॥

अतएव निर्गुणभक्तिज्ञानयोर्न कियदप्यन्तरं मन्यन्ते तत्त्वदृशः स्वरूपतस्तयोरेकात्मत्वात् अतत्त्वदर्शिनोऽज्ञा एवाविद्यामोहितत्वात् भिन्नदृशो भवन्ति ॥ वरं भक्तियोगमुपदिश्यानुपसंहारे ज्ञानविज्ञानसम्पन्ना भक्तिरेव ब्रह्मलब्धये सम्यक् हितसाधनीति प्रदर्शितवानुद्धवाय भगवान् ॥ यथा भागवते ११ । १८ । ४५-४६ ।

"भक्त्योद्धवानपायिन्या सर्व्वलोकमहेश्वरम् ।
सर्व्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः ॥
इति स्वधर्म्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः ।
ज्ञानविज्ञानसम्पन्नो न चिरात् समुपैति मां" ।

निष्कामेनानुष्ठितभक्तिरेव शनैः शनैः सान्द्रत्वेन निर्गुणतां गच्छन्ती सती परमप्रेमानन्दरूपेण परिणमते सुतरां तदा स्वयं सान्द्रानन्दमयं तज्ज्ञानं प्रकाशते । तयोर्हि तत्स्वरूपत्वात् न क्वापि निर्गुणभक्तिज्ञानयोरयोर्भेदः श्रूयते । यथा छान्दोग्ये "सत्यं ज्ञानमनन्तं ब्रह्म । आनन्दरूपममृतं यद् विभाति शान्तं शिवमद्वैतम्" । इति ज्ञानानन्दयोर्ब्रह्मस्वरूपत्वात् अतएव क्वचित् केनापि न पूर्णानन्दत्वेन परिणताया निर्गुणस्वरूपाया भक्तेर्ज्ञानेन सह किञ्चिदपि भेदो दर्शयितुं शक्यते